# अस्माकं परितः वर्तमानाः आर्थिकक्रियाकलापाः

अध्यायः १४

आर्थिकक्रियाकलापः समृद्धेः मूलम् अस्ति, तस्य अभावः भौतिकं क्लेशं जनयति। फलदायीनः आर्थिकक्रियाकलापस्य अभावे वर्तमानस्य समृद्धेः भाविविकासस्य च कृते सङ्कटः उत्पद्यते।

— कौटिलीयम् अर्थशास्त्रम्

## महत्त्वपूर्णाः प्रश्नाः ?

१. आर्थिकाः क्रियाकलापाः कथं वर्गीक्रियन्ते?

२. प्रसिद्धेषु क्रियाक्षेत्रेषु अन्तर्भावकाले इमे क्रियाकलापाः कथं विलक्षणाः भवन्ति ?


३. आर्थिकक्रियाकलापस्य त्रीणि क्षेत्राणि कथं परस्परं सम्बद्धानि सन्ति ?

0681CH14

### उपक्रमः

त्रयोदशाध्याये वयं द्वयोः क्रियाकलापयोः विषये ज्ञातवन्तः – आर्थिकः क्रियाकलापः, आर्थिकेतरः क्रियाकलापश्चेति। ये क्रियाकलापाः **मौद्रिकं मूल्यं** जनयन्ति ते आर्थिकाः क्रियाकलापाः इति कथ्यन्ते। आर्थिकेतराणां क्रियाकलापानाम् महत्त्वमपि वयं ज्ञातवन्तः। एतानि कार्याणि इतोऽपि सम्यक्तया अवगन्तुं वयम् अस्मिन् अध्याये आर्थिकक्रियाकलापानाम् वर्गीकरणं कथं भवति, तेषां मूलम् किम् इत्यादिषु विषयेषु ज्ञास्यामः।

**मौद्रिकं मूल्यम् :** वस्तुमूल्यं, यद् धनेन मापयितुं शक्यते तद् मौद्रिमूल्यमिति कथ्यते।



© NCERT not to be republished

विगतेषु दशकेषु आर्थिकक्रियाकलापानां संख्यायां वृद्धिः अभवत्। पूर्वम् अधिकाधिकाः जनाः कृषिकार्ये, पशुपालने, विविधोपकरणानां निर्माणे, कुम्भकार्ये, वस्त्रवयने अन्येषु च कार्येषु संलग्नाः आसन्। यथा यथा समाजाः प्रगतिम् अकुर्वन्, आर्थिकक्रियाकलापाः, येषां माध्यमेन जनाः स्वजीविकाम् अर्जितवन्तः, तेषां सङ्ख्या महती वर्धितवती।

अद्यत्वे विविधाः आर्थिकक्रियाकलापाः सन्ति। यथा, संगणकयन्त्रस्य दूरवाण्याः ड्रोनादियन्त्राणां च निर्माणम्, वित्तालये विद्यालये पर्यटकावासादिषु च कार्यम्, विविधप्रकाराणां यानानां चालनम्, पीठोपकरणानां निर्माणम्, यन्त्राणाम् उपयोगेन वस्त्रवयनम्, तन्त्रांशानां निर्माणम्, शीतलकादीनां धौतयन्त्राणां च संस्कारः इत्यादयः। एताः सर्वाः क्रियाः वर्गीकृताः चेत्, ताः कथं कार्यं कुर्वन्ति, कथं परस्परसम्बद्धाः सन्ति इति अवगन्तुं शक्नुमः।

## आर्थिकक्षेत्रेषु आर्थिकानां क्रियाकलापानां वर्गीकरणम्

केषाञ्चन आर्थिकानां क्रियाकलापानां वैशिष्ट्यानि समानानि एव तथा च तस्य आधारेण तेषाम् एकत्र वर्गीकरणम् अथवा व्यापकसमूहेषु वर्गीकरणं कर्तुं शक्यते। एते क्रियाकलापाः बृहत्परिसरेण आर्थिकक्षेत्रेषु अन्तर्भूताः भविष्यन्ति। आर्थिकक्षेत्राणां त्रयः मुख्यप्रकाराः सन्ति - प्राथमिकं क्षेत्रम्, द्वितीयकं क्षेत्रम्, तृतीयकं क्षेत्रम् चेति।

**आर्थिकक्षेत्राणि :** तथाभूतानि व्यापकक्षेत्राणि यत्र राष्ट्रस्य आर्थिकसमृद्धौ सहायकाः विविधाः क्रियाकलापाः अन्तर्भवन्ति।

अग्रिमायां पृष्ठायां यत् चित्रं दत्तमस्ति, तद् एतेषां वर्गानाम् अन्तर्गतानां विस्तृतक्रियाकलापानाम् एकां रूपरेखां निर्माति।

### क) प्राथमिकक्षेत्रस्य क्रियाकलापाः

येषु आर्थिकक्रियाकलापेषु जनाः वस्तूनाम् उत्पादनाय प्रकृतेः उपरि प्रत्यक्षतया आश्रिताः भवन्ति ते प्राथमिकक्रियाकलापाः अथवा प्राथमिकक्षेत्रसम्बद्धाः आर्थिकक्रियाकलापाः इति कथ्यन्ते।

**प्राथमिकं क्षेत्रम् -**
इदं तेषां कार्याणां समूहः यत्र प्रकृत्याः साक्षात् उत्पादितानां सामग्रीणां निर्गमनं भवति। यथा, कृषिः, मत्स्यपालनम्, वनपालनम् इत्यादीनि।

# आर्थिकक्षेत्रेषु आर्थिकानां क्रियाकलापानां वर्गीकरणम्

## प्राथमिकं क्षेत्रम्


कृषिः


खननम्


मत्स्यपालनम्


पशुपालनम्


वनपालनम्


## माध्यमिकं क्षेत्रम्


गृहनिर्माणम्


उत्पादनम्


जलव्यवस्था


सौरशक्तेः उत्पादनम्


विद्युतः उत्पादनम्

## तृतीयकं क्षेत्रम्


स्वास्थ्यसेवा


व्यापारः पण्यपरिवहनं च


सञ्चारः


अर्थव्यवहारः


परिवहनम्

© NCERT not to be republished

उदाहरणार्थं, कृषिक्षेत्रेभ्यः शस्यानां शाकानां च उत्पादनम्, अरण्येभ्यः काष्ठानां सङ्ग्रहणम्, खनितः अङ्गार-निष्कासनम्, मत्स्यपालनम्, कुक्कुटपालनक्षेत्रेभ्यः अण्डसङ्ग्रहणम् इत्येते सर्वे प्राथमिकक्षेत्रीय-आर्थिकक्रियाकलापाः सन्ति।

प्राथमिकक्रियाकलापेषु कृषिः,खननं, मत्स्यपालनं, पशुपालनं, वनपालनम् इत्यादयः सर्वाधिकं प्रचलन्ति। प्राथमिकक्षेत्राणाम् अन्तर्गताः केचन क्रियाकलापाः अधः दर्शिताः सन्ति।



हरितगृहे कर्षणम् (ग्रीनहाउस फार्मिंग्)



खननम्



मत्स्यपालनम् (फिशरी)



वनपालनम्



पशुपालनम्

## विषयेऽस्मिन् चिन्तयन्तु

किं भवन्तः एतादृशं किमपि प्राथमिकक्षेत्रीयं क्रियाकलापं चिन्तयितुं शक्नुवन्ति यत् भवद्भिः पूर्वं दृष्टमासीत्? एतेषु कार्यकलापेषु कानि कानि प्राकृतिकानि संसाधनानि उपयुज्यन्ते? तेषु द्वयोः नाम वदन्तु, किञ्च स्वानुभवानां विषये सहपाठिभिः सह चर्चयन्तु।

१.

२.

### ख) द्वितीयकक्षेत्रस्य क्रियाकलापाः

तादृशाः क्रियाकलापाः, यत्र जनाः प्राथमिकक्षेत्रस्य उत्पादनस्योपरि आश्रित्य तान् परिवर्त्य अन्येषां विविधवस्तूनां निर्माणं कुर्वन्ति, ते **द्वितीयक्षेत्रीयाः क्रियाकलापाः** अथवा **द्वितीयकक्षेत्रस्य आर्थिकक्रियाकलापाः** इति वा कथ्यन्ते।

द्वितीयकक्षेत्रे भवनानां, मार्गादीनां निर्माणं तथा जलं, विद्युत्, गैस इत्यादीनाम्, अन्येषाञ्च तादृशानाम् आवश्यकतानां पूर्तये सामग्रीप्रदानम् इत्यादिकम् अन्तर्भवति। अस्मिन् प्राथमिकक्षेत्रात् प्राप्तसम्पदानाम् अन्यरूपेण संसाधनं कृत्वा कारखानेषु निर्माणदलेषु च वस्तुनिर्माणमपि अन्तर्भवति यत् अग्रे विक्रेतुं वा उपभोक्तुं वा शक्यते। द्वितीयकक्षेत्रस्य आर्थिकक्रियाकलापानां कानिचन उदाहरणानि सन्ति - यथा, मिल् इत्यत्र पिष्टं निर्मातुं कृषिक्षेत्रेभ्यः प्राप्तधान्यानां प्रसंस्करणं, मूंगफलीतः तैलनिष्कासनं, चायं प्राप्तुं चायपत्राणां प्रसंस्करणं च। तथैव काष्ठानि वनाद् आनीय पीठोपकरणाकारेण कर्गदाकारेण च तेषां परिणमनं क्रियते। वस्त्रनिर्माणार्थं कपासस्य उपयोगः भवति तथा लोहस्पिण्डम् इस्पातरूपेण परिणमय्य कारयानं, ट्रकयानम् इत्यादिवाहनानां निर्माणं भवति।

**द्वितीयकक्षेत्रम् :** तादृशानां क्रियाकलापानां समूहः, यत्र प्राथमिकक्षेत्रात् प्राप्तानां सम्पदां विक्रयणाय उपभोगाय वा वस्तूनां निर्माणाय प्रसंस्करणं भवति।



**वाहननिर्माणस्य शिल्पागारः**



**वस्त्रनिर्माणस्य शिल्पागारः**


औषधोत्पादनकेन्द्रम्


पीठोपकरणानां निर्माणस्थलम्



## मा विस्मरन्तु

| वाहनानां प्रकाराः | २०२२ तमे वर्षे भारते उत्पादनपरिमाणम् |
|---|---|
| यात्रिवाहनानि, यथा कारयानम् | पञ्चचत्वारिंशत् (४५) लक्ष्यम् |
| वाणिज्यिकवाहनानि, यथा ट्रकयानम् | दश-दशमलव-त्रि (१०.३) लक्ष्यम् |
| त्रिचक्रिकाः | अष्टौ-दशमलव-षट् (८.६) लक्ष्यम् |
| द्विचक्रिकाः | द्वि-कोटि (२ कोटि) |

*(स्रोतः - भारतीय-वाहन-निर्माण-संस्था, https://www.siam.in/statistics.aspx?mpgid=8&pgidtrail=13)*

## एहि, वयम् अन्विषामः



इदानीं यदा वयं द्वितीयकक्षेत्रस्य क्रियाकलापानां कानिचन उदाहरणानि दृष्टवन्तः, तदा द्वितीयकक्षेत्रस्य अन्ययोः द्वयोः आर्थिकक्रियाकलापयोः नाम वक्तुं शक्यते वा?

१.

२.

not to be republished © NCERT

## ग) तृतीयकक्षेत्रस्य क्रियाकलापाः

प्राथमिक-द्वितीयकक्षेत्रयोः क्रियाकलापैः सह सम्बद्धानां जनानां साहाय्यं कुर्वन्तः सर्वे आर्थिकाः क्रियाकलापाः **तृतीयक्षेत्रीयाः क्रियाकलापाः अथवा** **तृतीयकक्षेत्रस्य आर्थिकक्रियाकलापाः** इति वा कथ्यन्ते। अत्र तादृशाः सेवाः अन्तर्भवन्ति, याः वयं प्रत्यक्षतया द्रष्टुं न शक्नुमः, तथापि याः अतीव महत्त्वपूर्णभूमिकां निर्वहन्ति। यथा - ट्रक्-चालकः कृषिक्षेत्रात् धान्यानि शाकानि च कारखानं विपणीं प्रति वा वहति।

फलविक्रेतारः शाकविक्रेतारश्च गृहस्थग्राहकाणां कृते कृषिजोत्पादानां विक्रयं कुर्वन्ति। तथैव वैद्याः, सेविकाः, शिक्षकाः, अधिवक्तारः, विमानचालकाश्च आवश्यकतानुसारं जनानां कृते सेवाप्रदानं कुर्वन्ति। तन्त्रज्ञाः चलदूरवाणी-दूरदर्शनादिसहितानाम् इलेक्ट्रॉनिक-वस्तूनाम् प्रतिसंस्कारं कुर्वन्ति, तत्सम्बद्धाः सेवाश्च प्रददति। यान्त्रिकाः कार्, ट्रैक्टर् इत्यादीनां वाहनानां पुनर्नवीकरणं कुर्वन्ति। विद्युत्कर्मिणः अस्माकं कृते विद्युतः आपूर्तिं सुनिश्चितं कुर्वन्ति। एतेषां सेवाः अस्माकं जीवने सौकर्यं साधयन्ति। तथैव चलदूरवाणीमाध्यमेन अन्तर्जालमाध्यमेन च संचार-सेवाः, तन्त्रांश-निर्माणं, पर्यटकावासेषु भोजनालयेषु, वित्तालयेषु, विद्यालयेषु चिकित्सालयेषु, विमानस्थानकेषु, आपणेषु, पण्यकोशादिषु सेवाः, सर्वाणि च एतानि तृतीयकक्षेत्रस्य आर्थिकानां क्रियाकलापानाम् उदाहरणानि सन्ति। एतत् क्षेत्रं सेवाक्षेत्रम् इत्यपि कथ्यते।

**तृतीयकक्षेत्रम् :** तादृशानां क्रियाकलापानां समूहः यस्मिन् प्राथमिकक्षेत्रस्य द्वितीयकक्षेत्रस्य च क्रियाकलापानां पूरकत्वेन सेवानां प्रावधानं भवति। यथा, परिवहनम्, अर्थव्यवहारः(बैंकिंग), व्यापारस्य प्रबन्धनम् इत्यादीनि।

**पण्यकोशः :** बृहन्ति भवनानि, यानि आपणेषु विक्रयणात्, व्यवहारात्, भाटकरूपेण प्रदानात् प्राक् शस्यानां संरक्षणाय उपयुज्यन्ते।



तन्त्रांशनिर्माणम्



भोजनालयेषु सेवाः

© NCERT not to be republished



विमानस्थानकेषु सेवाः



क्षुद्राः विक्रेतारः

## आर्थिकक्षेत्राणाम् अन्योन्याश्रयत्वम्

प्राकृतिकसम्पदाम् अन्तिमोपयोगाय सिद्धपदार्थेषु परिवर्तनस्य प्रक्रियायां त्रयः प्रकाराः आर्थिकक्रियाकलापाः अथवा त्रिप्रकारकाणि आर्थिकक्षेत्राणि महत्त्वपूर्णां भूमिकां निर्वहन्ति। गुजरातप्रान्तस्य आनन्दमण्डले कञ्चन ग्रामं प्रति काल्पनिकभ्रमणार्थं गच्छामः। तत्र वयम् एकं रोचकम् उदाहरणं पश्यामः, यस्य माध्यमेन त्रीणि आर्थिकक्षेत्राणि कथं परस्परसम्बद्धानि सन्ति, कथं च परस्परं साहाय्यं कुर्वन्ति इति अवगच्छामः।

### दुग्धसमवायः - गोदोहनात् थालिकां यावत्

अद्यत्वे गुजरातप्रान्तस्य कृषकाः दुग्धपात्राणां ध्वनिना एवञ्च स्वस्य परममित्राणां, स्वस्य गवां वा महिषाणां वा प्रसन्नध्वनिभिः स्वदिवसस्य स्वागतं कुर्वन्ति! कृषकाणां, तेषां परिवाराणां जीवने च गोः महत्स्थानम् अस्ति। कृषकाः गाः दुहन्ति समीपस्थायां **दुग्धशालायां** तस्य दुग्धस्य विक्रयणं कुर्वन्ति च। मासस्य अन्ते दुग्धस्य परिमाणं गुणवत्तां च आधारीकृत्य तैः वेतनं प्राप्यते। किन्तु पञ्चाशद्वर्षपूर्वमपि एतादृशं दृश्यं नासीत्।


एषा आनन्द मिल्क् यूनियन लिमिटेड् (अमुल्) इति नामधेयायाः दुग्धसमवायसंस्थायाः अद्भुतकथा अस्ति। चत्वारिंशदुत्तर-ऊनविंशतितमस्य (१९४०) ख्रीष्टाब्दस्य प्रारम्भे आनन्दमण्डलस्य कृषकैः समीपस्थेषु ग्रामेषु दुग्धं विक्रीयते स्म।

**दुग्धशाला :** तत् स्थानं यत्र दुग्धं संगृह्यते संरक्ष्यते च।

प्रचण्डातपे दुग्धं विक्रेतुं तेषां समीपस्थग्रामेषु द्विचक्रिकया पदेन वा गन्तव्यम् आसीत्। भवन्तः जानन्ति यद् उष्णतौ दुग्धं शीघ्रं दूषितं भवति दधि वा भवति। अतः दुग्धं नष्टं भविष्यति इति तस्मात् पूर्वमेव कृषकैः तस्य दुग्धस्य विक्रयणं कर्तव्यमासीत्। यत् सामान्यपरिमाणं धनं ते अर्जितवन्तः तस्य अपेक्षया तेषां परिश्रमः बहु अधिकम् आसीत्। अतः, ते मध्यस्वत्त्वभोगी इत्याख्यजनानाम् उपरि आश्रिताः आसन्, ये कृषकेभ्यः अल्पमूल्येन बृहत्परिमाणं दुग्धं क्रीत्वा विपण्यां विक्रयं कुर्वन्ति स्म । बहुवारं कृषकाः मध्यस्वत्त्वभोगिभिः वञ्चिताः उत्पीडिताश्च अभवन्।


**समवायः** - जनानाम् एकः समूहः, यत्र ते स्वेच्छया औपचारिकरूपेण स्वस्य आर्थ-सामाजिकयोः आवश्यकतयोः पूर्तये एकत्र समागताः भवन्ति। ते समवायस्य स्वामिनः भवन्ति तथा तत्र सदस्याः सामूहिकरूपेण एव निर्णयं कुर्वन्ति।

एकस्मिन् दिने कृषकाः सामूहिकरूपेण प्रमुखराष्ट्रनेता-सर्दार्-वल्लभभाई-पटेलमहोदयानां समीपे स्वसमस्याः निवेदितवन्तः। पटेलमहोदयाः **मध्यस्वत्त्वभोगिनाम्** आश्रयं त्यक्त्वा स्वतन्त्रतया **समवायं** स्थापयितुं तेभ्यः परामर्शं दत्तवन्तः। समवायस्य माध्यमेन कृषकाः समूहरूपेण दुग्धं क्रेतुं विक्रेतुं च समर्थाः भविष्यन्ति तथा दुग्धसङ्ग्रहणस्य, प्रसंस्करणस्य, वितरणस्य च सम्पूर्णं कार्यं स्वयमेव परिपालयिष्यन्ति। कृषकाः सरदारपटेलमहोदयानां परामर्शं अङ्गीकृतवन्तः।



षट्चत्वारिंशदुत्तर-ऊनविंशतितमे (१९४६) वर्षे त्रिभुवनदासपटेलः (सः अधिवक्ता एवञ्च स्वतंत्रता-सेनानी आसीत्।) एवञ्च डॉ. वर्गीज कुरिएन् (सः अभियन्तृरूपेण मुम्बईनगरे दुग्धशालायां कार्यं कुर्वन् आसीत्।) इत्येतयोः द्वयोः नेतृत्वेन अमुल् इत्यस्य स्थापना अभवत्।

**मध्यस्वत्त्वभोगिनः** - ये जनाः उत्पादकेभ्यः वस्तूनि क्रीत्वा उपभोक्तॄणां कृते तेषां विक्रयं कुर्वन्ति। अस्याः सेवायाः कृते मध्यस्वत्त्वभोगिनः शुल्कं स्वीकुर्वन्ति ।



वर्गीज कुरिएन् (वामभागे) तथा त्रिभुवनदासपटेलः (दक्षिणभागे)

© NCERT not to be republished

अनेन उपक्रमेण महिलाभिः सह कृषकान् योजयित्वा दुग्धोत्पादनविक्रययोः विषये समस्तं नियन्त्रणं तेभ्यः दत्तम्। दुग्धनिर्मातारः सामूहिकरूपेण दुग्धस्य उत्पादनं, **पास्तुरीकरणम्**, विक्रयणं चेत्यादिषु सर्वेषु विषयेषु स्वनिर्णयं कृतवन्तः। एतेषु कार्येषु सर्वेषामपि सहभागिता आसीत्, येन तेषां आयः क्रमेण वर्धितः जातः। इदानीं तेषां कृते पुनः मध्यस्वत्त्वभोगिनाम् आवश्यकता नासीत्। ते एकः बृहत्परिवारः इव आसन्!

यतः अधिकाधिकाः कृषकाः अधुना समवायस्य लाभान् दृष्टवन्तः, अतः तस्मिन् वृद्धिः अभवत्। यत् दुग्धं संगृह्यते स्म तस्य परिमाणम् एतावत् विशालम् आसीत् यत् कृषकाः तस्माद् अन्यानि अपि वस्तूनि निर्मातुं निश्चितवन्तः। ते आनन्दमण्डले **शिल्पागारं** स्थापयित्वा नवनीतं दुग्धचूर्णं च उत्पादयितुम् आरब्धवन्तः।





अद्यत्वे भारतस्य सर्वत्र अस्य समवायस्य अधीने अनेकानि दुग्धप्रक्रियासंस्थानानि शिल्पागाराश्च सन्ति तथा तत्र विविधप्रकाराः दुग्धजाताः पदार्थाः उत्पादिताः भवन्ति। एतेषां कतिपयानां नामानि वक्तुं शक्नुवन्ति वा? ततः देशस्य सर्वत्र लघूनां बृहतां च **विक्रयणकेन्द्राणां** परिवहनं विक्रयणं च क्रियते। वस्तुतः ते विश्वस्य अनेकदेशेषु अपि उत्पादानाम् **निर्यातं** कुर्वन्ति। किं तत् आश्चर्यं न जनयति?

अस्यां रोचकपूर्णायां कथायाम् अस्य समवायस्य कृषकाः पश्चात् दुग्धविक्रयणार्थं पूर्वं स्वस्य गाः दुहन्ति। एतादृशः आर्थिकक्रियाकलापः प्राथमिकक्षेत्रस्य आर्थिकक्रियाकलापः इति कथ्यते यतो हि अत्र उत्पादः (दुग्धम्) प्रत्यक्षतया प्राकृतिकस्रोतसः (गोभ्यः पशुभ्यो वा) प्राप्तो भवति।

**पास्तुरीकरणम् (पास्तुराइजेशन्स)** - यस्याः प्रक्रियायाः माध्यमेन हानिकारकं जीवाणुं नाशयितुं दुग्धं विशिष्टं तापमानं यावत् तापयित्वा संरक्षितं भवति।

**शिल्पागारः** - भवनं वा भवनसमूहः वा, यत्र वस्तूनां निर्माणं भवति अथवा वस्तुनिर्माणार्थं विविधानि उपादानानि एकत्र स्थापितानि भवन्ति।

**विक्रयणकेन्द्रम्** - पुनर्विक्रयणस्य अपेक्षया प्रत्येकं ग्राहकस्य उपभोगाय अल्पमात्रायां वस्तूनां विक्रयः।

**निर्यातः** - वस्तूनि सेवाश्च, यानि एकस्मिन् देशे उत्पाद्य, अन्यस्मिन् देशे क्रेतृभ्यः उपभोक्तृभ्यः वा विक्रीयन्ते।

ततः दुग्धस्य संसाधनं कृत्वा एकस्मात् रूपात् (तरलरूपात्) अन्यस्मिन् रूपे तस्य परिणमनं क्रियते - यथा, दुग्धचूर्णं, घृतं, प्रनीरं, नवनीतं, एवम् अन्ये च बहवः। एते आर्थिकक्रियाकलापाः द्वितीयकक्षेत्रस्य आर्थिकक्रियाकलापाः इति कथ्यन्ते।



अमुल् इति संस्था तेषां निर्मितैः सर्वैः उत्पादैः किं करोति? सः विविधस्थानेषु तेषाम् उत्पादानां विक्रयणं करोति। अमुलः स्वस्य उत्पादानाम् परिवहनार्थं लॉरी-ट्रकादिवाहनानाम् उपयोगं करोति। तथैव रेल-वायु-नौसेवानामपि उपयोगं करोति। अपि च इयं संस्था क्षुद्रविक्रयकेन्द्राणि स्थापयति तथा भारतस्य विभिन्नराज्यैः सह गुजरातस्य सर्वत्र जनपदानां, नगराणाम् एवञ्च ग्रामामाम् अन्येषु आपणेषु दुग्धस्य दुग्धजातपदार्थस्य च आपूर्तिं करोति। अत्र परिवहनं, व्यापारः, क्षुद्रविक्रयश्चेत्यादिकं सर्वं तृतीयकक्षेत्रस्य क्रियाकलापः अस्ति।



## मा विस्मरन्तु

अमुलः इव ब्राण्ड् इत्यस्य अन्तर्गताः अन्ये अपि बहवः दुग्धसमवायाः अर्थात् दुग्धसहकारीसंस्थाः सन्ति। यथा, कर्णाटकात् नन्दिनी, दिल्ली-एनसीआरतः मदर डेयरी, तमिलनाडुतः आविन्, आन्ध्रप्रदेशात् विजया, नागालैण्डतः केवी, बिहारतः सुधा, पञ्जाबतः वेरका इत्यादयः। किं भवन्तः परितः वर्तमानायाः एकस्याः समवायसंस्थायाः नाम वक्तुं शक्नुवन्ति, या कृषकाणां, दिव्याङ्गानां, महिलानादीनां समूहान् एकत्र आनीय तेषां साहाय्यम् अकरोत्, तेषां जीवने समृद्धिं च आनयत्?

अधोलिखितानां चित्राणां साहाय्येन भवताम् अध्ययनपुस्तकानि कथं निर्मितानि भवन्ति इति पश्यामः। चित्रेषु तन्तोः (वृक्षस्य काष्ठतन्तुः) कर्गदाकारेण तथा मुद्रणानन्तरं पाठ्यपुस्तकाकारेण च परिणमनं दृश्यते।



चित्रम् १४.१

© NCERT not to be republished

एकोऽपि क्रियाकलापः अस्याः प्रक्रियायाः अङ्गो नास्ति - वृक्षेभ्यः काष्ठतन्तोः निष्कासनाद् आरभ्य कर्गदाकारेण तस्य परिणमनम्, तथा अन्ते पुस्तकानां निर्माणम्, एकोऽपि कथमपि न सम्भवेद् यदि त्रीण्यपि क्षेत्राणि एकत्र कार्यं न कुर्वन्ति।

### विषयेऽस्मिन् चिन्तयतु

षडोत्तर-द्विशततमे (२०६) तमे पत्रे १४.१ तमे चित्रे प्रदत्ते दृष्टान्ते दर्शितप्रक्रियायाः विभिन्नपदार्थानान् अवलोक्य सहपाठिभिः सह चर्चयन्तु।

### एहि, वयम् अन्विषामः

षडोत्तरद्विशततमे (२०६) पत्रे १४.१ तमे चित्रे प्रदत्ते दृष्टान्ते दर्शितानां चित्राणाम् अधोलिखितानुसारं नामकरणं कुर्वन्तु -


१. प्राथमिक-क्षेत्रम्

२. द्वितीयक-क्षेत्रम्

३. तृतीयक-क्षेत्रम्

### मा विस्मरन्तु

अद्यत्वे प्रयुक्तं कर्गदं पुनरुपयुज्य नूतनं कर्गदं निर्मीयते। केवलम् एकटनपरिमितस्य कर्गदस्य पुनरुपयोगेन प्रायः सप्तदशवृक्षाः रक्षितुं शक्यन्ते। अपि च तेन २.५ घनमीटर्-परिमितम् अपशिष्टनिक्षेपस्थलमपि रक्षितं भवति, यत्र अपशिष्टं निक्षिप्यते। काष्ठतन्तोः नूतनकर्गदनिर्माणस्य अपेक्षया पुरातनं कर्गदं पुनः प्रयोक्तुं सप्ततिः (७०)-प्रतिशतं न्यूनशक्तिः जलं च आवश्यकौ भवतः।




© NCERT not to be republished

## एहि, वयम् अन्विषामः



भवतः/भवत्याः समीपस्थेषु परिसरेषु दृष्टानाम् आर्थिकक्रियाकलापानां सूचीं कृत्वा तेषां प्राथमिकं, द्वितीयकं, तृतीयकं वा इति समुचितरूपेण नामकरणं कुर्वन्तु। ते परस्परं कथं सम्बद्धाः सन्ति इति दर्शयितुं तत्र बाणसदृशानि चिह्नानि अङ्कयन्तु। केषु प्रकारेषु ते परस्परम् आश्रिताः सन्ति ? यदि एतेषु कोऽपि क्रियाकलापः निवृत्तः भवति तर्हि किं स्यात् ?



### अग्रे गमनात् प्राग् . . .

- अस्मिन् अध्याये वयम् आर्थिकस्य क्रियाकलापस्य त्रीणि क्षेत्राणि ज्ञातवन्तः।
- तत्र विभिन्नोदाहरणमाध्यमेन दृष्टान्तमुखेन च त्रिविधानाम् आर्थिकक्रियाकलापानाम् अथवा क्षेत्राणां मध्ये कः भेदः, तथा कथं ते परस्परम् आश्रिताः भवन्ति इति वयम् अवगतवन्तः — प्राथमिकं, द्वितीयकं, तृतीयकं चेति।

### प्रश्नाः, क्रियाकलापाः परियोजनाश्च

१. किं नाम प्राथमिकं क्षेत्रम्? कथं तत् द्वितीयकक्षेत्रात् भिद्यते ? द्वे उदाहरणे लिखन्तु।

२. द्वितीयकक्षेत्रं तृतीयकक्षेत्रस्य उपरि कथम् आश्रितम् ? कतिपयैः उदाहरणैः तद् व्याख्यायन्तु।

३. प्राथमिक-द्वितीयक-तृतीयक-क्षेत्राणां मध्ये आन्तर्निर्भरतायाः एकम् उदाहरणं ददतु। प्रवाहचित्रस्य उपयोगेन तद् दर्शयन्तु।

© NCERT not to be republished